International Journal of Sanskrit Research 2022; 8(1): 256-260

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 256-260
© 2022 IJSR
www.anantaajournal.com
Received: 07-10-2021
Accepted: 12-12-2021

**मैत्रेयी न्यूनहा**

प्रवक्ता संस्कृत विभागः,

तपस्या डिग्री कालेज

हैदराबाद्, तेलंगाना,

भारत

**Corresponding Author:**

**मैत्रेयी न्यूनहा**

प्रवक्ता संस्कृत विभागः,

तपस्या डिग्री कालेज

हैदराबाद्, तेलंगाना,

भारत

# महाभारतोपाख्यानानि – समाजशास्त्रीयमध्ययनम्

**मैत्रेयी न्यूनहा**

## प्रस्तावना

वैदिकशास्त्रसमुच्चयः शाश्वतसत्यं तथैव परिक्रमते यथा हि मही स्वधुरं भ्रमन्ती सूर्य परिक्रमते । शाश्वतसत्यं निगूढं, गम्भीरं, दुर्गमं, दुरीहं, दुरुहं, दुष्करञ्च वर्तते । सत्यं केवलं धर्मगम्यं वर्तते । धर्म एव अखिलब्रह्माण्डस्य निष्कर्षः यो हि जीवमात्रस्य अभ्युदयानिः श्रेयसं भोगापवर्गं च साधयति, सृष्टेरेतदेव प्रयोजनं खलु ।

एतन्महल्लक्ष्यं मनसि कृत्यैव लोकहिताय वैदिकसाहित्यस्य रचना विहिता । एतेषां शास्त्राणां महोच्चजटिलसारगर्भितज्ञानोपेताः विषयाः आख्यानोपाख्यानसरण्या, सरलसुन्दरसुगम्याकर्षकशैल्याम् अद्भुतमनोरञ्जकतया च सुबोधिताः । आख्यानोपाख्यानानामेव वैशिष्ट्यमस्ति यच्चिरकालान् मनुष्यः इतिहासं च प्रति आकृष्टः विद्यते ।

शास्त्रं खलु ज्ञानविज्ञानरूपिधर्मस्य शब्दरूपं वर्तते चेत् चरित्रेतिहासौ तस्य क्रियात्मकरूपेण वर्तेते। उभावपि मनोमस्तिष्कस्य आहारः विद्येते । यथाहि आहारमन्तरेण शरीरं निर्बलं रोगग्रस्तञ्च भवति तथैव शास्त्रेतिहासं विना मनोमस्तिष्कमपि बलहीनम्, अस्वस्थं भवति । यावत् साहित्येतिहासौ धर्मधुरि तिष्ठतः तावत् समाजः धार्मिकः प्रचरिष्यति । धर्महीनयोः, साहित्येतिहासयोः, सम्पूर्णः, समाजः धर्महीनः, दिशाहीनः, अस्वस्थः अशान्तिपूर्णश्च, भवति ।

धर्मः साहित्यस्य चरित्रस्य च आत्मा वर्तते चेत् आख्यानोपख्यानं तयोः प्राणः वर्तते । प्राणेन विना आत्मा, आत्मना विना प्राणः उभाभ्यां विना शरीररूपिसमाजस्य किमपि स्वरूपं न विद्यते ।

आख्यानोपाख्यानशब्दौ –

आसमन्तात् कथनम् आख्यानम् ।

अर्थात् प्रमुखपात्रसम्बद्धकथानां घटनानां च संविशदं वर्णनम् आख्यानम् ।

सामीप्येन कथनम् उपाख्यानम् ।

निकटरुपेण कथानां घटनानाञ्च समासतः वर्णनम् उपाख्यानम् ।

अनुसंधात्रनुसारेण उपाख्यानशब्दस्य अर्थः वर्तते –

मूलकथायाः स्थाने स्वाभिप्रायप्रकाशनार्थं इतिहासाश्रितपुराणेषु लोके च प्रचलितघटनानां संग्रहः उपाख्यानम् ।

आख्यानशास्त्रम् अतिपुरातनं वर्तते । ऐतरेयब्राह्मणे शौनः – शेपाख्यानशब्दस्य प्रयोगः उपलभ्यते पुरा अश्वमेधपरिसमाप्तौ आख्यानानि श्रावयन्ते स्म । एतादृशस्य अन्यतमप्रसंगस्य संकेतः वायुपुराणे अ.67 उपलभ्यते – उत्कृष्टनैव विधिना आख्यानादौ यथाविधि आसनान्युपक्लृप्तानि काञ्चनानि तु पञ्च वै । अर्थात् स्वल्पाकृतौ कस्यचित् प्रधानव्यक्तेः जीवनस्योपरि विलिख्यमाना स्वल्पकाले उच्यमाना च इतिहासविषया कथा आख्यानमभिधीयते ।

विष्णुपुराणस्यान्तर्गते 3/6/16 उपाख्यानं शब्दस्यार्थे टीकाकारेण श्रीधरस्वामिना लिख्यते दृष्टोपलब्ध कथनमुपाख्यानं प्रचक्षते दृष्टोपलब्धकथनम् उपाख्यानम् अख्यायते ।

वैदिक धार्मिकशास्त्रे इतिहासे च ईदृश दृढसंस्काराणां बीजानि वर्तन्ते यैरियं वैदिकी संस्कृतिः सम्पूर्णेऽस्मिन् जगति आदर्शरूपेण विराजमाना वर्तते ।

कस्यापि राष्ट्रस्य उन्नतिः तत्रत्यसंस्कृतिसभ्यताशिक्षास्वास्थ्येतिहासम् आश्रित्य सम्भवति । इदमेवकारणं वर्तते यत् संस्कृतेः स्वरूपं तद्विशेषताः जीवनमूल्यानि च अस्माकं ऋषयः शास्त्रकाराः साहित्यकाराश्च प्रमुख ग्रन्थेषु अलंकृतवन्तः, संगृहीतवन्तश्च । ते प्रमुखग्रन्थाः वर्तन्ते – वेदाः, उपवेदाः, ब्राह्मणग्रन्थाः, आरण्यकाः, उपनिषदः, स्मृतयः, सूत्रग्रन्थाश्च एवं ऐतिहासिकग्रन्थेषु रामायणं, महाभारतं, पुराणादीनि । ग्रन्थानां संख्यायाः विपुलतायाश्च दृष्ट्या भारतीयसंस्कृतिः विशालसागरवत् विराजते यस्याः व्यापकतायाः, गम्भीरतायाः, विविधतायाः, सम्पन्नतायाश्च तलस्पर्शिज्ञानं न चेदसम्भवः खलु दुष्करमिति वितथमेव ।

कस्यचिदपि राष्ट्रस्य कर्तव्यपारायणार्थं, सचेतनार्थं, जागुरुकार्थं नैतिकजीवनं प्रति आकर्षणार्थं च यावन्महत्वम् आध्यात्मिकग्रन्थानां वर्तते तावदेव ऐतिहासिकग्रन्थानामपि वर्तते यतो हि एतेषु पूर्वघटितघटनानां यथार्थं चित्रणम् उपवर्णितं वर्तते । एतेषां रचनायाः उद्देश्यं व्यतीतात् शिक्षणं प्राप्य वर्तमानमलंकृत्य भविष्यन्तं सुदृढयेम ।

भारतस्य गौरवमयः, प्रेरणादायकः, ओजोमयः, इतिहासः भारतस्य प्राचीनग्रन्थेषु एव लभ्यते । स एव संस्कृतेः आधारः वर्तते ।

काव्ये आख्यानम् –

रामायणं, महाभारतं च अस्माकम् इतिहासस्य पुरातने महाकाव्ये वर्तेते । अनयोः महाकाव्ययोः महनीयतापेक्षया रामायणस्य सर्वोच्चं स्थानं वर्तते । रामायणस्य कर्ता महर्षिः वाल्मीकिः विश्वस्य आदिकविरूपेण अंगीक्रियते अत एव सः आदिकविः इत्युपाधिना विभूषितः वर्तते । तेषां काव्यसन्दर्भे यथार्थः श्लोकः प्रस्तूयते –

कूजन्तं रामरामेति, मधुरं मधुराक्षरम् ।
आरूहय कवितशाखां वन्दे वाल्मीकि कोकिलम् ।।

महर्षिवाल्मीकिः गायत्रीमन्त्रस्य चतुर्विंशत्यक्षराणां संख्याम् अनुसृत्य अनुष्टुप् – छन्दसि समग्ररामायणस्य संरचनां सरलं, सहजं च निबबन्ध । रामायणेऽस्मिन् सप्तकाण्डानि, चतुर्विंशतिसहस्त्रं श्लोकाश्च वर्तन्ते यस्मिन् रामस्य चरितमेव नास्ति अपितु मातृभक्तिः, गुरूभक्तिः, पातिव्रत्यं, भ्रातृप्रेम, प्रजया सह नृपस्य पुत्रवत् व्यवहारः, राजानं प्रति सेवकभक्तिः सुशासनोपेतस्य समग्रराज्यस्य योजनादयः अस्मिन् महाकाव्ये उपलभ्यन्ते । आधुनिक युगेऽपि मनुष्यः रामराज्यं आकांक्षते ।

एतदनन्तरं द्वितीयमहाकाव्यान्तर्गते महाभारत संदृशः बृहत्ग्रन्थः भारतीयमनीषायाः उपहारः वर्तते । विश्वसाहित्ये विशालकायं महाकाव्यं महाभारतं भारतीयप्रबुद्धमेधाशक्तेः अद्भुताभिव्यक्तिः

वर्तते । महाभारतस्याध्ययनेन वयम् अस्य रचयितुः महर्षेः वेदव्यासस्य प्रखरप्रतिभया आश्चर्यचकिताः भवामः ।

यथानाम तथा गुणः इति सूक्त्यनुसारं महर्षिः वेदव्यासः चतुर्णां वेदानामध्ययनस्य पश्चात् ऊर्धस्तलं निष्कर्षं स्वस्मिन् महाभारतकाव्ये प्रस्तुत्य जनकल्याणार्थं योगदानं कृतवन्तः । यः अविस्मरणीयः विषयः खलु ।

कौरवपाण्डवानां जीवनवृतान्तं, महाभारतयुद्धस्य च मूलगाधायाः कथात्वेन सह तीर्थ माहत्म्यं मातृ पितृ गुरुजनान् प्रति भक्तिः, आदरः, प्रेम, सत्यं, दानं, तपः इत्यादीनि नैतिकगुणानां महात्म्यं, वर्णाश्रमधर्मः, राजकर्त्तव्यानि आचरणानि, मोक्षविषयकं ज्ञानं दर्शनं नारीसम्मानं, धर्म अध्यात्मेनयुक्ताः विविधउपदेशाः, मानवजीवनेन सम्बन्धितरहस्यं इत्यादयः विषयाः आख्यानोपाख्यानमाध्यमेन रोचकरूपेण दृश्यन्ते । एवं महाभारतग्रन्थः विविधप्रकाराणां कथानां लोककथानां च मौलिकग्रन्थः वर्तते ।

व्यासराचितमहाकाव्यं अष्टादशपर्वसु निबद्धमस्ति यथा हि – आदि पर्व, सभा पर्व, वन पर्व, विराट् पर्व, उद्योग पर्व, भीष्म पर्व, द्रोण पर्व, आश्वमेधिक पर्व, आश्रमवासिक पर्व, मौसल पर्व, महाप्रस्थानिक पर्व, अन्तिम पर्व । एषु अष्टादशपर्वसु वयं आख्यानोपाख्यानानां सुदीर्घपरम्परां प्राप्नुमः।।

महाभारतं एकं सामाजिकशास्त्रं वर्तते, मनुष्यः खलु सामाजिकः प्राणी । मनुष्यः वर्तते व्यष्टेः रूपे समाजश्च अस्ति समष्टेः स्वरूपम् । अस्ति मनुष्यस्य, समाजस्य च अन्योन्याश्रित सम्बन्धः । समाजः परम्परायां, मर्यादायां युक्तो भवति । सामाजिक व्यक्तेः कर्तव्यं वर्तते यत् तेषां पालनं कुर्वन् स्वजीवनोन्नत्या सह तस्मिन् मार्गे अन्यानपि प्रेरयेत ।।

समाजस्य कृते चरितम् एकं जीवनं वर्तते । सामाजिकव्यक्तेः चरितमेव जीवनशास्त्रं वर्तते । चरितमाध्यमेनैव व्यक्तेः गुणाः अवगुणाः ज्ञायन्ते । व्यक्तिविशेषस्य जीवनचरितमेव अन्येषां कृते पथप्रदर्शकः भवति ।

महाभारतान्तर्गतानाम् आख्यानोपाख्यानानां पद्धतिः जीवनचरितमेव प्रदर्शयति । यः अद्यतनीनयुगस्य कृते अनुसरणीयः कल्याणप्रदश्च वर्तते ।

आदि पर्वणि – रुरुप्रमद्वरयोरुपाख्यानम्, जरत्कारु आस्तिकयोरूपाख्यानम् कद्रुविनतयोरूपाख्यानम् अमृतमन्थयोरूपाख्यानम्, शकुन्तलादुष्यन्तयोरूपाख्यानम् कचदेवयान् योरूपाख्यानम्, यतातेरूपाख्यनम्, विदुरस्यपूर्वजन्मनः उपाख्यानम् । व्युषिताश्वस्योपाख्यनम्, द्रौपदेः पूर्वजन्मनः उपाख्यानम् सुन्द – उपसुन्दयोरूपाख्यानम्, श्वेतकेः उपाख्यानम्, शारंगकस्यश्चोउपाख्यानम् वर्णितमस्ति।

सभापर्वणि - हरिश्चन्द्रस्योपाख्यानम्, जरासन्धः जन्मनः उपाख्यानम् ।

शिशुपालस्य जन्मनः उपाख्यानम् –

वनपर्वणि सुरभि इन्द्रयोश्चोपाख्यानम्, शाल्ववधस्योपाख्यानम्, नलदमयन्त्योरूपाख्यानम्, अगस्त्यस्योपास्यानम् सागर भगीरथ्योपचोपाख्यानम् ऋषशुंगोपाख्यानम् यवक्रीतोपाख्यानम् अप्सवक्रोपाख्यानम् उशीनस्योपाख्यानम्, अष्टावक्रस्योपाख्यानम्, यवक्रीतस्योपाख्यानम्, रामोपाख्यानम्, मत्स्यावतारस्योपाख्यानम्, इन्द्रद्युम्नयोरूपाख्यानम् उतंकस्योपाख्यानम् कौषिक बाह्मणयोरूपाख्यानम्, सत्यवान् सावित्र्ययोरूपाख्यानम् ।

उद्योगपर्वणि – नहुषस्योपाख्यानम्, मालत्योरूपाख्यानम्, विदुलायारूपाख्यानम्, अम्बायारूपाख्यानम् ।

द्रोणपर्व – षोडशराजकीयस्योपाख्यानम् ।

शल्यपर्व – विश्वामित्रस्योपाख्यानम्, स्कन्दस्योपाख्यानम्

शान्ति पर्व – महर्षिनारदस्योपाख्यानम्, वेन पृत्थ्वोरूपाख्यानम्, पुरुरवस्योपाख्यानम्, मुचुकुन्दस्योपाख्यानम्, केकयराजराक्षस्योरूपाख्यानम्, कालकवृक्षस्यमुनेरूपाख्यानम्, इन्द्रप्रह्लादस्योरूपाख्यानम्, त्रिमत्स्यस्योपाख्यानम्,

व्याध - कपोत कपोत्योरूपाख्यानम् जाजलि तुलाधार वैश्ययोरूपाख्यानम् ।

अनुशासन पर्वणि – गौतमब्राह्मणययोरूपाख्यानम् मतंगस्योपाख्यानम् विपुलस्योपाख्यानम्, कीटस्योपाख्यानम्

**आश्वमेधिकपर्वणि – मरूत्तसंवर्तस्योपाख्यानम्** ।

इमानि उपाख्यानानि दृष्ट्वा इदं ज्ञायते यत् एषु उपाख्यानेषु कानिचन उपाख्यानानि वैदिकमूलान्तर्गतानि वर्तन्ते येषां समावेशः रूपान्तरेण पौराणिकोपाख्यानेषु अभूत् । कानिचन उपाख्यानानि शुद्धरूपेण पैराणिकमूलस्य वर्तन्ते, कानिचन च लौकिकमूलस्य वर्तन्ते ।

वैदिकमूलस्य रूपान्तरितेषु आख्यानेषु वृत्रासुरकद्रुविनतयोरूपाख्यानम्, गरुडकचदेवयान्यो-रूपाख्यानि नेतुं शक्नुमः ।

विशुद्ध पौराणिकमूलस्य उपाख्यानेषु इन्द्रमातल्योरूपाख्यानम्, सुन्द उपसुन्दस्योपाख्यानम् रामस्योपाख्यानम्, स्कन्दस्योपाख्यानम् वराहावतारस्योपाख्यानम् आदीनि उपाख्यानानि गृह्णीमः ।

लौकिकमूलस्य आख्यानेषु दुष्यन्त शकुन्तलयोरुपाख्यानम्, च्यवन सुकन्ययोश्चोपाख्यानम्, विदुलोपाख्यानम्, धर्मव्याधस्योपाख्यानम् कपोत कपोती आदीनि उपाख्यानानि नेतुं शक्नुमः ।

**महाभारतशान्तिपर्वणि चिरकार्योरुपाख्यानम् -**

धर्मराज युधिष्ठिरः पितामहभीष्मं प्रत्युच्यते – यत् भवान् मम परमगुरुः वर्तते कृपया मह्यं उपदिशन्तु यत् कदाचित् मम समक्षे एवं कार्यम् उपस्थितं भवेत् यः गुरुजनानां आज्ञानुसारेण अवश्यं करणीयं वर्तते परं हिसायुक्ते सति दुष्करम् अनुचितं च प्रतीयते तर्हि प्रसंगेऽस्मिन् किं कुर्याम शीघ्रतां कुर्याम नोचेत् चिरकालपर्यन्तं विचार्य कार्यं विदधामः । उत्तरेऽस्मिन् पितामहः महाभारतान्तर्गते गौतमचिरकार्योः उपाख्यानेन राजा युधिष्ठिरस्य जिज्ञासां शमयति ।

प्राचीनकाले महर्षेः गौतमस्य एकः आज्ञाकारी महाज्ञानी च पुत्रः बभूव । सर्वे जनाः तं चिरकारी इति नाम्ना आह्वयन्ति स्म यतो हि सः चिरकालपर्यन्तं जागर्ति स्म चिरकालपर्यन्तं च किमपि कार्यं विचार्य करोति स्म ।

एकदा महर्षिः स्वपत्न्यौ क्रुध्यन् स्वपुत्रम् उवाच स्वमातृशिरः कर्तयतु इत्यादिश्य सः महर्षिः आश्रमतः बहिर्जगाम । अत्र चिरकारी स्वपितुः आज्ञां पौनः – पुन्येन भिन्न भिन्न रूपेण विचारितवान् । अहं किं कुर्यां येन पितुराज्ञायाः पालनं भवेत् मातुश्च वधोऽपि न भवेत् यतो हि –

पितुराज्ञा परमोधर्मः स्वधर्मो मातृरक्षणम् ।
अस्वतन्त्रं च पुत्रत्वं कि तु मां नानुपीडयेत् ।।

पितृवर्यायाः आज्ञा परमो धर्मः मातृरक्षणं च पुत्रस्य प्रधानः धर्मः वर्तते । पुत्रः स्वतन्त्रः न भवति सदैव सः पित्रोः वशगतो भवति, अतः किं कुर्याम येन धर्मस्य हानिः न भवेत् । तथा च –

स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत् ।
पितरं चाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् ।।

मातृवधं कृत्वा कः पुत्रः सुखी भवेत् पितुः अवहेलनां विधाय कः प्रतिष्ठां प्राप्तुं शक्नोति । अन्यच्चः-

पिताधर्मः पिता स्वर्गः पिता हि परमं तपः ।
पितरि प्रीतिमापन्ने सर्वाः प्रीयन्ति देवताः ।।

पिता धर्मः पिता स्वर्गः पिता एव परमं तपः पितरि प्रीतिमापन्ने सर्वाः देवताः प्रसन्नाः भवन्ति ।

नास्तिमातृसमा छाया नास्तिमातृसमागतिः ।
नास्तिमातृसमं त्राणं नास्तिमातृसमा प्रिया ।।

मातृसदृशः छाया नास्ति मातृसमा गतिः नास्ति, मातृसदृशः अन्यः कोऽपि रक्षको न वर्तते तथा पुत्रस्य कृते मातृसमं प्रियं वस्तु नास्ति । अतः किं कुर्याम येन पितु अनादरः न भवेत् मातृरक्षणमपि सिद्धयेत । द्वयोः अपि पुत्रस्य प्रधानकर्तव्यं वर्तते । एवं सः चिरकरी बहुकालपर्यन्तं धर्मा-धर्म प्रसंगं विचचार । तत्र गौतमः महर्षिरपि स्वपत्नेः वधसम्बन्धिचिन्तनं न्यायमन्यायञ्च सुदीर्घकालं विचारितवान् । यदा सः आश्रमं प्रति प्रत्याजगाम तर्हि चिरकारी कर्त्तव्यरूपीधर्माधर्मस्य न्यायान्यायस्य च विचारं करोति स्म अतः सः स्वमातृवधं न कृतवान्।

महर्षिः गौतम स्व चिरकारीपुत्रस्य चिरकाल पर्यन्तं न्यायान्यायस्य धर्माधर्मस्य उचितानुचितस्य च चिन्तनं दृष्ट्वा अत्यन्तं प्रसन्नमनाः अभूत् । अस्य चिरकारित्व स्वभावस्य हेतोः महानर्थो नाभूत् ।

इदमुपाख्यानं समाजस्य कृते आदर्शोपाख्यानं वर्तते । मनुष्यः पिता भवेत् अथ च पुत्रः । सः किमपि कार्यं विना विचार्य न कुर्यात् । एकैकस्य सम्बन्धस्य महत्वं स्व स्व आदर्शः, कर्तव्यादि सद्गुणानां प्राकट्येन सह सभ्य-प्रिय-शालीन-सुव्यवस्थित-समाजस्य निर्माणं भवति यः भोग-मोक्षयोः अनुरूपं सारल्येन विधीयमाना रचना अस्ति अतः कर्तव्यस्य पालनं धर्मन्यायसत्यानुसारं परीक्ष्य कुर्यात्, एवं कृते सति संसारे मनुष्यः सुखी भूत्वा दुःखान्मुक्तः भवेत् ।

एवं महाभारतस्य आख्यानोपाख्यानानां व्याख्यानेषु विविधानां विषयाणां विश्लेषणं दरीदृश्यते । जीवनस्य विविधसमस्यानां समाधानं प्राप्यते । समाजः यथाधर्मं अर्थ-काम-मोक्षादीनां, चतुर्विधफलं प्राप्नुयात् इति संदेशः वर्तते यः अद्यतनीनस्य समाजस्य कृते अत्यन्तं उपयोगकरं वर्तते । सेर्वषां शास्त्राणां उद्देश्यः प्रणिमात्रस्य शान्त्यर्थं, कल्याणार्थं वर्तते स एव धर्मः ।

**निष्कर्षः**

अद्यापि समाजे विभिन्नाः समस्याः वर्तन्ते येन समाजः दुःखानुभूतिम् अनुभवति । सर्वासां समस्यानां समाधानं महाभारते वर्तते । यदपि महाभारते अस्ति तत् संसारे वर्तते यद् महाभारते नास्ति तत् संसारे अपि नास्ति अत एव उक्तम् –

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहस्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।।

**सन्दर्भग्रन्थ सूची** –


1. आचार्य बलदेव उपाध्याय – संस्कृत वाङ्मय का बृहद् इतिहास - उत्तर प्रदेश संस्कृत संस्थान लखनऊ
2. पंडित भगवदत्त जी – भारत वर्ष का बृहद् इतिहास - प्रणव प्रकाशन नई दिल्ली
3. महर्षि वेदव्यास – महाभारत गीता प्रेस
4. महर्षि वाल्मीकि – रामायण गीता प्रेस